देयमित्याह। ऋणं लेख्यकृतन्देयं पुरुषैस्त्रिभिरेव तु। यथा साक्ष्यादिकृतन्तथ्यन्त्रिभिरेव देयं तथा लेख्यकृतमप्याहर्त्तृपुत्रतत्पुत्रैस्त्रिभिरेव देयम्। न चतुर्थादिभिरिति नियम्यते। ननु पुत्रपौत्रैर्ऋणन्देयमित्यविशेषेणर्णमात्रन्त्रिभिरेव देयमिति नियतमेव। बाढ़मस्यैवोत्सर्गस्य पत्रारूढ़र्णविषये स्मृत्यन्तरप्रभवामपवादशङ्कामपनेतुमिदं वचनमारब्धम्। तथा हि। पत्रलक्षणमभिधाय कात्यायनेनाभिहितम्। एवं कालमतिक्रान्तं पितॄणान्दाप्यते ऋणमिति। इत्थं पत्रारूढ़मतिक्रान्तकालमपि पितॄणामपि पितॄणां सम्बन्धि दाप्यते। अत्र पितॄणामिति बहुवचननिर्द्देशात् कालमतिक्रान्तमिति वचनाच्चतुर्थादिर्दाप्यत इति प्रतीयते। तथा हारीतेनापि। लेख्यं यस्य भवेद्धस्ते लाभन्तस्य विनिर्द्दिशेदिति। अत्रापि यस्य हस्ते पत्रमस्ति तस्यर्णलाभ इति सामान्येन चतुर्थादिभ्योऽप्यृणलाभोऽस्तीति प्रतीयते। अतस्तेतदाशङ्कानिवृत्त्यर्थं एतद्वचनमिति युक्तम्। वचनद्वयन्तु योगीश्वरवचनानुसारेण योजनीयम्॥ *॥ अस्यापवादमाह। आधिस्तु भुज्यते तावद्यावत्तन्न प्रदीयते। सबन्धकेऽपि पत्रारूढ़े ऋणे त्रिभिरेव देयमिति नियमादृणापकरणानधिकारेणाध्याहरणेऽप्यनधिकारप्राप्ताविदमुच्यते। यावच्चतुर्थेन पञ्चमेन वा ऋणं न दीयते तावदेवाधिर्भुज्यत इति वदता सबन्धकर्णापाकरणे चतुर्थादेरप्यधिकारो दर्शितः। नन्वेतदप्ययुक्तमेव फलभोग्यो न नश्यतीति सत्यम्। तदप्येतस्मिन्न सत्यपवादवचने पुरुषत्रयविषयमेव स्यादिति सर्व्वमनवद्यम्॥ *॥ प्रासङ्गिकं परिसमाप्य प्रकृतमेवानुसरति।

"देशान्तरस्थे दुर्लेख्ये नष्टोन्मृष्टे हृते तथा।
भिन्ने दग्धेऽथवा च्छिन्ने लेख्यमन्यत्तु कारयेत्॥"

व्यवहाराक्षमे पत्रे पत्रान्तरं कुर्य्यादिति विधीयते। व्यवहाराक्षमत्वञ्चात्यन्तव्यवहितदेशान्तरस्थे पत्रे दुर्लेख्ये दुष्टानि सन्दिह्यमानानि अवाचकानि वा लेख्यानि लिप्यक्षराणि पदानि वा यस्मिंस्तद्दुर्लेख्यं तस्मिन्दुर्लेख्ये नष्टे कालवशेन उन्मृष्टे मसीदौर्ब्बल्यादिना म्रदिते लिप्यक्षरे हृते तस्करादिभिर्भिन्ने विदलिते दग्धे अग्निना छिन्ने द्विधा भूते सति द्विर्भवति। एतच्चार्थिप्रत्यर्थिनोः परस्परानुमतौ सत्यां विमत्यान्तु व्यवहाराप्राप्तौ देशान्तरस्थपत्रानयनाध्यानापेक्षया कालो दातव्यः दुर्द्देशावस्थिते नष्टे वा पत्रे साक्षिभिरेव व्यवहारनिर्णयः कार्य्यः। यथाह नारदः।

"लेखे देशान्तरन्यस्ते शीर्णे दुर्लिखिते हृते।
सतस्तत्कालकरणमसतो द्रष्टदर्शनम्॥" इति॥

सतो विद्यमानपत्रस्य देशान्तरस्थस्यानयनाय कालकरणं कालावधिर्दातव्यः। असतः पुनरविद्यमानस्य पत्रस्य पूर्व्वं ये द्रष्टारः साक्षिणस्तेषां दर्शनं व्यवहारपरिसमापनं कार्य्यम्। यदा तु साक्षिणो न सन्ति तदा दिव्येन निर्णयः कार्य्यः अलेख्यसाक्षिके दैवीं व्यवहारे विनिर्द्दिशेदिति स्मरणात्। एतच्च जानपदं व्यवस्थापत्रम्। राजकीयमपि व्यवस्थापत्रमीदृशमेव भवति। इयांस्तु विशेषः।

"राज्ञः स्वहस्तसंयुक्तं स्वमुद्राचिह्नितन्तथा।
राजकीयं स्मृतं लेख्यं सर्व्वेष्वर्थेषु साक्षिमत्॥"
इति॥ *॥

तथान्यदपि राजकीयं जयपत्रं वृहद्वशिष्ठेनोक्तम्।
यथोपन्यस्तसाध्यार्थसंयुक्तं सोत्तरक्रियम्।
सावधारणकञ्चैव जयपत्रकमिष्यते॥
प्राड्विवाकादिहस्ताङ्कं मुद्रितं राजमुद्रया।
सिद्धेऽर्थे वादिने दद्याज्जयिने जयपत्रकमिति॥

तथा। सभासदोऽपि मतं मेऽमुकपुत्रस्येति स्वहस्तं दद्युः।

"सभासदश्च ये तत्र स्मृतिशास्त्रविदः स्थिताः।
यथा लेख्यविधौ तद्वत् स्वहस्तं दद्युरेव ते॥"
इति मनुस्मरणात्॥

सभासदाञ्च परस्परानुमतिव्यतिरेकेण व्यवहारो निःशल्यो भवति। यथाह नारदः।

"यत्र सभ्यो जनः सर्व्वः साध्वि तदिति मन्यते।
स निःशल्यो विवादः स्यात् सशल्यस्त्वन्यथा भवेत्॥" इति।

एतच्चतुष्पाद्व्यवहार एव।

"साधयेत् साध्यमर्थं यच्चतुष्पादान्वितञ्च यत्।
राजमुद्राङ्कितञ्चैव जयपत्रकमिष्यते॥"
इति स्मरणात्॥

यत्र तु हीनता यथा।

"अन्यवादी क्रियाद्वेषी नोपस्थाता निरुत्तरः।
आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः॥"
इति॥

तत्र न जयपत्रमस्ति अपि तु हीनपत्रमेव तच्च कालान्तरे दण्डप्राप्त्यर्थं जयपत्रं तु प्राङ्न्यायविधिसिद्ध्यर्थमिति विशेषः। लेख्यसन्देहे निर्णयनिमित्तान्याह।

"सन्दिग्धलेख्यशुद्धिः स्यात् स्वहस्तलिखितादिभिः।
युक्तिप्राप्तिक्रियाचिह्नसम्बन्धागमहेतुभिः॥"

शुद्धमशुद्धञ्चेति सन्दिग्धस्य लेख्यस्य शुद्धिः स्वहस्तलिखितादिभिः स्यात्। स्वहस्तेन लिखितं यल्लेख्यान्तरन्तेन शुद्धिः। यदि सदृशान्यक्षराणि भवन्ति तदा शुद्धिः स्यादित्यर्थः। आदिशब्दात् साक्षिलेखकस्वहस्तलिखितान्तरसम्बादाच्छुद्धिरिति। युक्त्या प्राप्तिर्युक्तिप्राप्तिः। देशकालपुरुषाणां द्रव्येण सह सम्बन्धः प्राप्तिः। अस्मिन्देशे अस्मिन् काले अस्य पुरुषस्येदं द्रव्यं घटत इति युक्तिः। प्राप्तिः क्रिया तत्साक्ष्युपन्यासः। चिह्नमसाधारणं श्रीकारादि। सम्बन्धः अर्थिप्रत्यर्थिनोः पूर्व्वमपि परस्परविश्वासेन दानग्रहणादिसम्बन्धः। आगमोऽस्यैतावतोऽर्थस्य सम्भावितः प्राप्त्युपायः। एत एव हेतवः। एभिर्हेतुभिः सन्दिग्धलेख्यशुद्धिः स्यादित्यन्वयः। यदा तु लेख्ये सन्देहनिर्णयो न जायते तदा साक्षिभिर्निर्णयः कार्य्यः। यथाह कात्यायनः।

"दूषिते पत्रके वादी तदारूढांस्तु निर्द्दिशेत्॥"
इति।

साक्षिसम्भवविषयमिदं वचनम्। साक्ष्यसम्भवविषयन्तु हारीतवचनम्।

"न मयैतत् कृतं पत्रं कूटमेतेन कारितम्।
अधरीकृत्य तत् पत्रमथ दिव्येन निर्णयः॥"
इति॥ *॥

एवं शोधिते पत्रे ऋणे च दातव्ये प्राप्ते यदा तत्क्षणमेवर्णन्दातुमसमर्थस्तदा किं कर्त्तव्यमित्यत आह।

"लेख्यस्य पृष्ठेऽभिलिखेद्दत्त्वा दत्त्वर्णिको धनम्।
धनी चोपगतं दद्यात् स्वहस्तपरिचिह्नितम्॥"

यदाधमर्णिकः सकलमृणं दातुमसमर्थस्तदा शक्त्यनुसारेण दत्त्वा दत्त्वा पूर्व्वकृतस्य लेख्यस्य पृष्ठेऽभिलिखेदेतावन्मया दत्तमिति। उत्तमर्णो वा उपगतं प्राप्तं धनन्तस्यैव लेख्यस्य पृष्ठे दद्यादभिलिखेदेतावन्मया लब्धमिति। कथं स्वहस्तपरिचिह्नितम्। स्वहस्तलिखिताक्षरचिह्नितम्। यद्वोपगतं प्रवेशपत्रं स्वहस्तलिखितचिह्नितमधमर्णायोत्तमर्णो दद्यात्॥ *॥ ऋणे तु कृत्स्ने दत्ते लेख्यं किं कर्त्तव्यमित्यत आह।

"दत्त्वर्णं पाटयेल्लेख्यं शुद्ध्यै चान्यत्तु कारयेत्॥"

क्रमेण सकृदेव वा कृत्स्नमृणन्दत्त्वा पूर्व्वकृतं लेख्यम्पाटयेत्। यदा तु दुर्गदेशावस्थितं लेख्यं नष्टं वा तदा शुद्ध्यै अधमर्णत्वनिवृत्त्यर्थमन्यल्लेख्यं कारयेदुत्तमर्णमधमर्णः पूर्व्वोक्तक्रमेणोत्तमर्णो विशुद्धिपत्रं अधमर्णाय दद्यादित्यर्थः॥ *॥ ससाक्षिके ऋणे कृत्स्ने दातव्ये किं कर्त्तव्यमित्यत आह।

"साक्षिमच्च भवेत् यद्वा तद्दातव्यं ससाक्षिकम्।"

यत्तु ससाक्षिकमृणन्तत् पूर्व्वसाक्षिसमक्षमेव दद्यात्। इति लेख्यप्रकरणम्। इति मिताक्षरायां व्यवहाराध्यायः॥

लेख्यचूर्णिका, स्त्री, (लेख्यस्य चूर्णिका।) तूलिका इति शब्दरत्नावली॥

लेख्यपत्रः, पुं, (लेख्यं लेखार्हं पत्रं अस्य।) तालवृक्षः। इति भावप्रकाशः॥ लेखनीयपत्रे, क्ली॥

लेख्यस्थानं, क्ली, (लेख्यस्य स्थानम्।) लिख्यते यत्र। आफिस इति दप्तरखाना इति च म्लेच्छभाषा। तत्पर्य्यायः। ग्रन्थकुटी २। इति शब्दरत्नावली॥

लेण्डं, क्ली, गूथम्। ल्याड़ इति भाषा। यथा,—
"उत्ससर्ज्ज हृष्टलेण्डं मूत्रञ्च भयमाप ह॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे धेनुकासुरवधे २२ अध्यायः॥

लेप, ऋ ङ गमने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ऋ, अलिलेपत्। ङ, लेपते लिलेपे। इति दुर्गादासः॥

लेपः, पुं, (लिप+घञ्।) लेपनम्। (यथा, मार्कण्डेये। ३५। १५।